स्नेहाद्यैः कर्म्मभिर्नृणाम् । विविधादभिघाताच्च रोगोत्थानात् प्रपाकतः । श्रमात् क्षयादजीर्णाच्च विषात् सात्म्यर्त्तुपर्य्ययात् । ओषधीपुष्पगन्धाच्च शोकान्नक्षत्रपीड़नात् । अभिचाराभिशापाभ्यां मनोभूताभिशङ्कया । स्त्रीणामपप्रजातानां प्रजातानां तथाऽहितैः । स्तन्यावतरणे चैव ज्वरो दोषैः प्रवर्त्तते । तैर्वेगवद्भिर्बहुधा समुद्भ्रान्तैर्विमार्गगैः । विक्षिप्यमाणोऽन्तरग्निर्भवत्याशु बहिश्चरः । रुणद्धि चाप्यपान्थानं यस्मात्तस्माज्ज्वरातुरः । भवत्यत्युष्णगात्रश्च न च स्विद्यति सर्व्वशः । श्रमोऽरतिर्विवर्णत्वं वैरस्यं नयनप्लवः । इच्छाद्वेषौ मुहुश्चापि शीतवातातपादिषु । जृम्भाङ्गमर्द्दौ गुरुता रोमहर्षोऽरुचिस्तमः । अप्रहर्षश्च शीतञ्च भवत्युत्पत्स्यति ज्वरे । सामान्यतो विशेषात्तु जृम्भात्यर्थं समीरणात् । पित्तान्नयनयोर्दाहः कफान्नान्नाभिनन्दनम् । सर्व्वलिङ्गसमावायः सर्व्वदोषप्रकोपजे । द्वयोर्द्वयोस्तु रूपेण संसृष्टं द्वन्द्वजं विदुः । वेपथुर्विषमो वेगः कण्ठौष्ठमुखशोषणम् । निद्रानाशः क्षवः स्तम्भो गात्राणां रौक्ष्यमेव च । शिरोहृद्गात्ररुग्वक्त्रवैरस्यं बद्धविट्कता । जृम्भाध्मानं तथा शूलं भवत्यनिलजे ज्वरे । वेगस्तीक्ष्णोऽतिसारश्च निद्राल्पत्वं तथा वमिः । कण्ठौष्ठमुखनासानां पाकः स्वेदश्च जायते । प्रलापः कटुता वक्त्रे मूर्च्छा दाहो मदस्तृषा । पीतविण्मूत्रनेत्रत्वं पैत्तिके भ्रम एव च । गौरवं शीतमुत्क्लेशो रोमहर्षोऽतिनिद्रता । स्रोतोरोधो रुगल्पत्वं प्रसेको मधुरास्यता । नात्युष्णगात्रता छर्द्दिरङ्गसादोऽविपाकता । प्रतिश्यायोऽरुचिः कासः कफजेऽक्ष्णोश्च शुक्लता । निद्रानाशो भ्रमः श्वासस्तन्द्रा सुप्ताङ्गताऽरुचिः । तृष्णा मोहो मदः स्तम्भो दाहः शीतं हृदि व्यथा । पक्तिश्चिरेण दोषाणामुन्मादः श्यावदन्तता । रसना परुषा कृष्णा सन्धिमूर्द्धास्थिजा रुजः । निर्भुग्नकलुषे नेत्रे कर्णौ शब्दरुगन्वितौ । प्रलापः स्रोतसां पाकः कूजनं चेतनाच्युतिः । स्वेदमूत्रपुरीषाणामल्पशः सुचिरात् स्रुतिः । सर्व्वजे सर्व्वलिङ्गानि विशेषश्चात्र मे शृणु । नात्युष्णशीतोऽल्पसंज्ञो भ्रान्तप्रेक्षी हतस्वरः । खरजिह्वः शुष्ककण्ठः स्वेदविण्मूत्रवर्ज्जितः । सास्रनिर्भुग्नहृदयो भक्तद्वेषी हतप्रभः । श्वसन् निपतितः शेते प्रलापोपद्रवैर्युतः । तमभिन्यासमित्याहुर्हतौजसमथापरे । सन्निपातज्वरं कृच्छ्रमसाध्यमपरे विदुः । निद्रोपेतमभिन्यासं क्षीणमेनं हतौजसम् । संन्यस्तगात्रं संन्यासं विद्यात्सर्व्वात्मके ज्वरे । ओजोविस्रंसते यस्य पित्तानिलसमुच्छ्रयात् । स गात्रस्तम्भशीताभ्यां शयने स्यादचेतनः । अपि जाग्रत् स्वपन् जन्तुस्तन्द्रालुश्च प्रलापवान् । संहृष्टरोमा स्रस्ताङ्गो मन्दसन्तापवेदनः । ओजोनिरोधजं तस्य जानीयात् कुशलो भिषक् । सप्तमे दिवसे प्राप्ते दशमे द्वादशेऽपि वा । पुनर्घोरतरो भूत्वा प्रशमं याति हन्ति वा । द्विदोषोच्छ्रायलिङ्गास्तु द्वन्द्वजास्त्रिविधाः स्मृताः । जृम्भाध्मानमदोत्कम्पपर्व्वभेदपरिक्षयाः । तृट्प्रलापाभितापाः स्युर्ज्वरे मारुतपैत्तिके । शूलकासकफोत्क्लेशशीतवेपथुपीनसाः । गौरवारुचिविष्टम्भा वातश्लेष्मसमुद्भवे । शीतदाहारुचिस्तम्भस्वेदमोहमदभ्रमाः । कासाङ्गसादहृल्लासा भवन्ति कफपैत्तिके । क्षामाणां ज्वरमुक्तानां मिथ्याहारविहारिणाम् । दोषः स्वल्पोऽपि संवृद्धो देहिनामनिलेरितः । सन्ततान्येद्युष्कत्र्याख्यचातुर्थान् सप्रलेपकान् । कफस्थानविभागेन यथासङ्ख्यं करोति हि । अहोरात्रादहोरात्रात् स्थानात् स्थानं प्रपद्यते । ततश्चामाशयं प्राप्य घोरं कुर्य्याज्ज्वरं नृणाम् । तथा प्रलेपको ज्ञेयः शोषिणां प्राणनाशनः । दुश्चिकित्स्यतमो मन्दः सुकष्टो धातुशोषकृत् । कफस्थानेषु वा दोषस्तिष्ठन् द्वित्रिचतुर्षु वा । विपर्य्ययाख्यान् कुरुते विषमान् कृच्छ्रसाधनान् । परो हेतुः स्वभावो वा विषमे कैश्चिदीरितः । आगन्तुश्चानुबन्धो हि प्रायशो विषमज्वरे । वाताधिकत्वात् प्रवदन्ति तज्ज्ञास्तृतीयकञ्चापि चतुर्थकञ्च । औपात्यके मद्यसमुद्भवे च हेतुं ज्वरे पित्तकृतं वदन्ति । प्रलेपकं वातबलासकञ्च कफाधिकत्वेन वदन्ति तज्ज्ञाः । मूर्च्छानुबन्धा विषमज्वरा ये प्रायेण ते द्वन्द्वसमुत्थितास्तु । त्वक्स्थौ श्लेष्मानिलौ शीतमादौ जनयतो ज्वरे । तयोः प्रशान्तयोः पित्तमन्ते दाहं करोति च । करोत्यादौ तथा पित्तं त्वक्स्थं दाहमतीव च । तस्मिन् प्रशान्ते त्वितरौ कुरुतः शीतमन्ततः । द्वावेतौ दाहशीतादौ ज्वरौ संसर्गजौ स्मृतौ । दाहपूर्व्वस्तयोः कष्टः कृच्छ्रसाध्यतमः स्मृतः । प्रसक्तस्याभिघातोत्थश्चेतनाप्रभवस्तु यः । रात्र्यह्नोः षट्सु कालेषु कीर्त्तितेषु यथा पुरा । प्रसह्य विषमोऽभ्येति मानवं बहुधा ज्वरः । स चापि विषमो देहं न कदाचिद्विमुञ्चति । ग्लानिगौरवकार्श्येभ्यः स यस्मान्न प्रमुच्यते । वेगे तु समतिक्रान्ते गतोऽयमिति लक्ष्यते । धात्वन्तरस्थो लीनत्वान्न सौक्ष्म्यादुपलभ्यते ।